बहुशश्च किञ्चिदिदं मतश्री वाजीकरं तत्तत् ॥
मधुसुखमिव कोमलं प्रियाया:
कलरवलापरिवादिनी प्रियेव ।
कुसुमचयमनोरमा च शय्या
किसलयिनी लतिकेव पुष्पिताग्रा ॥
देशे शरीरे च न कश्चिदर्ति-
र्यथैव वाच्योऽपि मनोविघात: ।
वाजीकरा: सन्निहिताश्च योगा:
कामस्य कामं परिपूरयन्ति ॥"
इति वाभटे उत्तरस्थाने ४० अध्याय: ॥

तथाच ।
"वाजीकरणमन्विच्छेत् पुरुषो नित्यमात्मवान् ।
तदायत्तौ हि धर्म्मार्थौ प्रीतिश्च यश एव च ॥
पुत्त्रस्यायतनं ह्येतद्गुणाश्चैते सुताश्रया: ।
वाजीकरणमग्र्यञ्च क्षेत्रं स्त्री या प्रहर्षिणी ॥
इष्टा ह्येकैकशोऽप्यर्था: परं प्रीतिकरा: स्मृता: ।
किं पुन: स्त्रीशरीरे ये संघातेन व्यवस्थिता: ॥
सङ्घातो हीन्द्रियार्थानां स्त्रीषु नान्यत्र विद्यते ।
स्त्र्याश्रयो हीन्द्रियार्थो य: सप्रीतिजननो-
ऽधिक: ॥"
"अच्छायश्चैकशाखश्च निष्फलश्च यथा द्रुम: ।
अनिष्टगन्धश्चैकश्च निरपत्यस्तथा नर: ॥
चित्रदीप: सर:शुष्कमधातुर्धातुसन्निभ: ।
निष्प्रजस्तृणपूलीति ज्ञातव्य: पुरुषाकृति: ॥
अप्रतिष्ठश्च नग्नश्च शून्यश्चैकेन्द्रियश्च ना ।
मन्तव्यो निष्क्रियश्चैव यस्यापत्यं न विद्यते ॥
बहुमूर्त्तिर्बहुमुखो बहुव्यूहो बहुक्रिय: ।
बहुचक्षुर्बहुज्ञानो बह्वात्मा च बहुप्रज: ॥
मङ्गल्योऽयं प्रशस्तोऽयं धन्योऽयं वीर्य्यवानयम् ।
बहुशाखोऽयमिति च स्तूयते ना बहुप्रज: ॥
प्रीतिर्बलं सुखं वृत्तिर्विस्तारो विपुलं कुलम् ।
यशो लोका: सुखोदर्कास्तुष्टिश्चापत्यसंश्रिता ॥
तस्मादपत्यमन्विच्छन् गुणांश्चापत्यसंश्रितान् ॥
वाजीकरणनित्य: स्यादिच्छेत् कामसुखानि च ।
मात्रामाषात्मगुप्ताया जीवनामाढकं नवम् ॥
जीवकर्षभकौ वीरं मेदाऋद्धिं शतावरीम् ।
मधुकश्चाश्वगन्धाञ्च साधयेत् कुडवोन्मितान् ॥
रसे तस्मिन् घृतप्रस्थं गव्यं दशगुणं पय: ।
विदारीणां रसप्रस्थं प्रस्थमिक्षुरसस्य च ॥
दत्त्वा मृद्वग्निना साध्यं सिद्धं सर्पिर्निधापयेत् ।
शर्कराया स्तुगाक्षीर्य्या: क्षौद्रस्य च पृथक्
पृथक् ॥
भागांश्चतुष्पलांस्तत्र पिप्पल्याश्चावपेत् पलम् ।
पलं पूर्व्वमतो लीढ्वा ततोऽन्नमुपयोजयेत् ॥
न दृक्ष्येद्वयं शुक्रं शेफश्चोत्तमं बलम् ।"
इति वाजीकरणं घृतम् ॥*॥

"चटकानां सहंसानां दक्षाणां शिखिना-
न्तथा ।
शिशुमारस्य नक्रस्य भिषक् शुक्राणि संहरेत् ॥
गव्यं सर्पिर्वराहस्य कुलिङ्गस्य वसामपि ।
षष्टिकानाञ्च चूर्णानि चूर्णं गौधूममेव च ॥
एभि: पूपलिका: कार्य्या: शष्कुल्यो वर्त्तिका
स्तथा ॥
पूपाधराश्च विविधा भक्ष्याश्चान्ये पृथग्विधा: ।
एषां प्रयोगाद्भक्ष्याणां स्तब्धेनापूर्णरेतसा ॥
शेफसा वाजिवद्याति यावदिच्छन् स्त्रियो
नर: ॥"
इति वृष्यपूपालिकयोग: ॥*॥

"मत्स्यैर्जातरूपस्य तस्या एव पय:शृतम् ।
अपत्यजननं सिद्धं सघृतक्षौद्रशर्करम् ॥"
"आर्द्राणि मत्स्यमांसानि भृष्टाश्च शफरीश्च वा ।
तप्ते सर्पिषि य: खादेत् स गच्छेत् स्त्रीषु न
क्षयम् ॥
घृतभृष्टान् रसे छागे रोहितान् फलसाधिते ॥
अनुपीतरसान् सिद्धानपत्यार्थी प्रयोजयेत् ॥"
इति गर्भाधानकरो योग: ॥*॥

"नर्ते वै षोड़शाद्वर्षात् सप्तत्या: परतो न च ।
आयुष्कामो नर: स्त्रीभि: संयोगं कर्त्तुमर्हति ॥
अतिबालो ह्यसम्पूर्णसर्व्वधातु: स्त्रियो व्रजन् ।
उपतप्येत सहसा तड़ागमिव काजलम् ॥
शुष्करूक्षं यथाकाष्ठं जन्तुदग्धं विजर्ज्जरम् ।
स्पृष्टमाशु विशीर्य्येत तथा वृद्धस्त्रियो व्रजन् ॥
जरया चिन्तया शुक्रं व्याधिभि: कर्म्मकर्षणात् ।
क्षयं गच्छत्यनशनात् स्त्रीणाञ्चातिनिषेवणात् ॥
क्षयाद्भयादविश्रम्भाच्छोकात् स्त्रीदोषदर्शनात् ।
नारीणामरसज्ञत्वादभिचारादसेवनात् ॥
क्षमस्यापि स्त्रियो गन्तुं न शक्तिरुपजायते ।
देहसत्त्वबलापेक्षो हर्ष: शक्तिश्च हर्षणा ॥"
इति चरके चिकित्सितस्थाने द्वितीयेऽध्याये ॥)

वाञ्छा, स्त्री (वाञ्छनमिति । वाछि इच्छायाम् । गुरोश्चेत्य: । टाप् ।) आत्मवृत्तिगुणविशेष: । सा च द्विविधा यथा । उपायविषयिणी फल-विषयिणी वा । फलं सुखं दु:खाभावश्च । तत्र फलेच्छां प्रति फलज्ञानं कारणम् । उपायेच्छां प्रति इष्टसाधनताज्ञानं कारणम् । इति सिद्धान्तमुक्तावली ॥ तत्पर्य्याय: । इच्छा २ काङ्क्षा ३ स्पृहा ४ ईहा ५ तृट् ६ लिप्सा ७ मनोरथ: ८ काम: ९ अभिलाष: १० तर्ष: ११ । इत्यमर: ।१।७।२७॥ आकाङ्क्षा १२ कान्ति: १३ अनुनय: १४ दोहद: १५ आभिलाष: १६ । इति शब्दरत्नावली ॥ वश् १७ रुचि: १८ मति: १९ दोहलम् २० छन्द: २१ । इति जटाधर: ॥ (यथा, कथासरित्सागरे ।११।२७।
"सन्दिदेश च यद्यस्ति वाञ्छा मच्छिष्यतां प्रति ।
तत्पुत्त्रालङ्कृदिहैवैषा भवता प्रेष्यतामिति ॥")

वाञ्छितं, त्रि, (वाञ्छ + क्त: ।) अभिलषितम् । यथा,—
"अविच्छेदं पठेद्धीमान् ध्यात्वा देवीं सरस्वतीम् ।
शुक्लाम्बरधरां देवीं मुक्ताभरणभूषिताम् ॥
वाञ्छितं फलमाप्नोति स लोके नात्र संशय: ।
इति ब्रह्मा स्वयं प्राह सरस्वत्या: स्तवं शुभम् ॥"
इति तन्त्रसार: ॥

वाञ्छिनी, स्त्री, (वाञ्छतीति । वाञ्छ + णिनि: । ङीप् ।) वाञ्छनीया नारी । तत्पर्य्याय: । लज्जिका २ कलतूलिका ३ । इति त्रिकाण्ड-शेष: ॥ वाञ्छनीयमात्रे, त्रि ॥

वाटं, क्ली, वरण्ड: । गात्रभेद: । इत्यमरटीका ॥ यथा,—
"वाट: पथि वृतौ वाटं वरण्डे गात्रभेदयो: ।"
इति हेम: ॥

वाट:, पुं, (वट्यते वेष्ट्यते इति । वट + घञ् ।) मार्ग: । वृतिस्थानम् । इति मेदिनी । टे, २८ ॥ अपि च ।
"सुखं नि:सरणं वाटि प्राचीनावेष्टकौ वृति: ।"
इति हेमचन्द्र: ॥
(वास्तु । मण्डप: । यथा, भागवते ।८।१८।२३ ।
"छत्रं सदण्डं सजलं कमण्डलुं
विवेश विभ्रद्धयमेधवाटम् ॥"
वटस्येदमिति । वट + अण् । वटसम्बन्धिनि, त्रि । यथा, मनु: ।२।४५ ।
"ब्राह्मणो बैल्वपालाशौ क्षत्त्रियो वाटखा-
दिरौ ।
पैलवौदुम्बरौ वैश्यो दण्डानर्हन्ति धर्म्मत: ॥" )

वाटशृङ्खला, स्त्री, (वाटरोधिका शृङ्खला । शाकपार्थिवादिवत् मध्यपदलोप: ।) पथरोधक-शृङ्खला । तत्पर्य्याय: । लम्भा २ । इति हारावली ॥

वाटिका, स्त्री, (वट्यते वेष्ट्यते प्राचीरादिभि-रिति । वट वेष्टने + संज्ञायामिति ण्वुल् । टाप् । अत इत्वम् ।) वास्तु । (यथा, कथासरित्-सागरे । ७२ । २०६ ।
"सा स्नानाय गते तस्मिन् शाकार्थं शाकवाटि-
काम् ।
प्रविश्य धावकखरं खादन्तं शाकमैक्षत ॥")
वाट्यालक: । इति शब्दरत्नावली ॥ हिङ्गुपत्री । इति शब्दचन्द्रिका ॥

वाटी, स्त्री, (वट्यते वेष्ट्यते इति । वट वेष्टने + घञ् । गौरादित्वात् ङीष् ।) वाट्यालक: । इति शब्दरत्नावली ॥ कुटी । वास्तु । इति मेदिनी । टे, २८ ॥ शेषस्य पर्य्याय: ।
"वाटस्त्री वेश्म भूर्व्वाटी वाटिका गृहपोतक: ॥"
इति शब्दरत्नावली ॥
तस्या वस्वादिर्यथा,—
विश्वकर्म्मोवाच ।
"के ते वृक्षा:शुभाश्चाथ निषिद्धाश्चापि केशव ।
भद्रा भद्रप्रदाश्चापि तान् वदस्व जगद्गुरो ॥
केषामन्तनिरूपञ्च शिविरञ्च शुभाशुभम् ।
शिल्पि कुत्र जलं भद्रमशुभञ्च वद प्रभो ॥
द्वाराणाञ्च गृहाणाञ्च प्राकाराणां प्रमाणकम् ।
भद्रप्रदश्च को वृक्षो शिल्पि कुत्र प्रवर्त्तते ॥
किं प्रमाणं गृहाणाञ्च प्राङ्गणानां जगद्गुरो ।
मङ्गलं कुसुमोद्यानं शिल्पि कुत्र तरोस्तथा ॥
प्राकारं किंप्रमाणञ्च परिखाणां सुरेश्वर ।
द्वाराणाञ्च गृहाणाञ्च प्राकाराणां प्रमाणकम् ॥
कस्य कस्य तरो: काष्ठं प्रशस्तं शिविरे प्रभो ।
अमङ्गलं वा केषां वा सर्व्वं मां वक्तुमर्हसि ॥*॥
श्रीभगवानुवाच ।
आश्रमे नारिकेलश्च गृहिणाञ्च धनप्रद: ।